"ब्रह्मा प्रोवाच ततः प्रजापतिरधिजगे तस्मादश्विनावश्विभ्यामिन्द्र इन्द्रादहं मया त्विह प्रदेयमर्थिभ्यः प्रजाहितहेतोः" ॥ इति सुश्रुतः ॥)

आयुर्व्वेदी, [न्] त्रि, (आयुर्व्वेदो ज्ञातव्यत्वेन विद्यते यस्य । आयुर्व्वेद + इनि ।) आयुर्व्वेदज्ञः । चिकित्सकः । वैद्यः । इति हेमचन्द्रः राजनिर्घण्टश्च ॥

आयुर्योगः, पुं, (आयुषो जीवितकालस्य योगो भवत्यस्मात् ।) औषधं । इति राजनिर्घण्टः ।

आयुष्मान्, [त्] त्रि, (आयुस् + मतुप् ।) चिरजीवी । दीर्घायुः । तत्पर्य्यायः । जैवातृकः २ । इत्यमरः ॥ (यथा मनुः, २ । १२५,३ । २६३ ।
"आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने" ।
"आयुष्मन्तं सुतं सूते यशोमेधासमन्वितं" इति च ॥)

आयुष्मान्, पुं, विष्कुम्भादिसप्तविंशतियोगान्तर्गततृतीययोगः । तत्र जातफलं । "यस्यायुष्मान् जन्मकाले धनुष्मान् याने यानं तस्य देशेषु कार्य्यं । कुर्य्यान्नूनं क्रीडनं पुष्पवाट्यां दासैर्व्वासैरन्वितो गर्व्वितश्च" ॥ इति दीपिका ॥
("आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि" इति सुश्रुतः ॥)

आयुष्यं, त्रि, (आयुष् + यत् ।) पथ्यं । इति राजनिर्घण्टः ॥ आयुर्हितकारकं ॥ (मनुः । ४।१०६ ।
"धन्यं यशस्यमायुष्यं स्वर्ग्यं चातिथिपूजनं" ।
तत्रैव २ । ५२ ।
"आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखम्" ।
"आयुष्यं भोजनं जीर्णे वेगानाञ्चाविधारणं ।
ब्रह्मचर्य्यमहिंसा च साहसानाञ्च वर्ज्जनं" ॥
इति सुश्रुतः ॥
"आयुष्या दीपनी चैव चक्षुष्या व्रणशोधिनी" ।
इति हारीतः ।)

आयुष्यसूक्तं, क्ली, (आयुष्यञ्च तत्सूक्तञ्चेति । कर्म्मधारयः ।) नान्दीश्राद्धादौ वसुधारासम्पातनानन्तरपाठ्यो वैदिकमन्त्रविशेषः ।
सामगानां तन्मन्त्रो यथा,—
ॐ आयुर्विश्वायुर्विश्वं विश्वमायुरसिमहि । प्रजान्त्वष्टरधिनिधेह्यस्मे शतं जीवेम शरदो वयन्ते । आयुषे मे पवस्व वर्च्चसे मे पवस्व विदुः पृथिव्या दिवो जनित्या शृण्वन्त्वापोधःक्षरन्ती सोमो रुद्राय ममायुषे मम ब्रह्मवर्च्चसाय यजमानस्यर्द्ध्या अमुष्य राज्याय । अमुष्य स्थाने यदर्थं वृद्धिस्तस्य षष्ठ्यन्तनाम प्रयोज्यं । इति रघुनन्दनभट्टाचार्य्यकृतश्राद्धप्रयोगतत्त्वं ॥ * ॥
यजुर्व्वेदी तन्मन्त्रो यथा,—
ॐ आयुष्यं वर्च्चस्यं रायस्पोषमौद्भिदं इदं हिरण्यं वर्च्चस्व जैत्रायाविशतादुमां । न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्रथमजं ह्येतत् । यो बिभर्त्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दीर्घमायुः समनुष्येषु कृणुते दीर्घमायुः । यदा बध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः । तन्न आवध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासं" । इति तत्कृतयजुर्व्वेदीयश्राद्धप्रयोगतत्त्वं ॥

आयुस्करः, त्रि, (आयुस् + कृ + क ।) परमायुर्ज्जनकः ॥ (आयुर्वृद्धिजनकः ;
"सद्यामलकशुक्तिभिरर्द्धसरेण तैलेन वा
गुडेन पयसा घृतेन यवशक्तुभिर्वा सह ।
तिलेन सहमाक्षिकेण पललेन सूपेन वा
वपुष्करमरुक्करं परममेध्यमायुस्करं" ॥
इति वाभटः ॥)

आयोगः, पुं, (आङ् + युज् + घञ् ।) गन्धमाल्योपहारः । व्यापारः । रोधः । इति हेमचन्द्रः ॥ (यथा रामायणे,—
"सरलैः कर्णिकारैश्च किंशुकैश्च सुपुष्पितैः ।
स देशो भ्रमरायोगः प्रदीप्त इव लक्ष्यते" ॥)

आयोगवः, पुं, (अयोगव एव स्वार्थे अण् ।) शूद्राद्वैश्यायां जातो जातिविशेषः । इति हेमचन्द्रः ॥ तस्य कर्म्म काष्ठतक्षणं । (यथा मनुः १०।१२, १० । १६ ।
"शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणां ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः" ॥
"आयोगवोऽयं क्षत्ता च चाण्डालश्चाधमो नृणां ।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः" ॥)

आयोजनं, क्ली, (आङ् + युज् + ल्युट् ।) उद्योगः । आहरणं । द्रव्यासादनं । यथा,—
"कुत्रचित् तण्डुलाः सन्ति क्व च स्थाली क्व चेन्धनं ।
तेषामायोजनं कुर्व्वन् मुख्यः कर्त्ताभिधीयते" ॥
इति गोयीचन्द्रकृतकारिका ॥

आयोधनं, क्ली, (आङ् + युध + ल्युट् ।) युद्धं । बधः । इति मेदिनी ॥ (रघुवंशे, ६।४२ ।
"आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिं" ।
भट्टिः, "आयोधने व्यायुकमस्त्रजातम्" ।
रघुः, ५ । ७१ । "आयोधनाग्रसरतां त्वयि वीर ! याते ।)

आरं, क्ली, (आङ् + ऋ + भावे घञ् ।) मुण्डायसं । मुण्डलोहं । इति राजनिर्घण्टः ॥ पित्तलं । इत्यमरटीका ॥ कोणः । प्रान्तभागः । इत्यानन्दलहरीटीका ॥ (चक्राङ्काष्ठभेदः । यथा महाभारते,
"आरान्तरेणापतत् संक्षिप्याङ्गं क्षणेन ह" ।
"यस्त्रिषष्टिशतारण्यं वेदार्थं स परः कविः" ॥)

आरः, पुं, (आङ् + ऋ + कर्त्तरि संज्ञायां घञ् ।) मङ्गलग्रहः । शनिः । पित्तलं । इति हेमचन्द्रः ॥ वृक्षभेदः । तत्पर्य्यायः । मधुराम्लफलः २ । इति रत्नमाला ॥ रेफल इति ख्यातः ॥

आरकूटः, पुं क्ली. (आरं कूटयति स्तूपीकरोति पचाद्यच् ।) पित्तलं । इत्यमरः ॥ (यथा नैषधे ।
"अकाञ्चने काञ्चननायिकाङ्के किमारकूटाभरणेन न श्रियः" ।)

आरक्षं, त्रि, (आरक्षतीति । आङ् + रक्ष + अच् ।) रक्षायुक्तं । इति शब्दरत्नावली ॥ रक्षणीयं । इति विश्वः ॥

आरक्षः, पुं, (आङ + रक्ष + अच् ।) गजकुम्भसन्धिः । इति त्रिकाण्डशेषः ॥

आरग्वधः, पुं, (आ + रुगे शङ्कायां क्विप् । आरुगं रोगशङ्कामपि हन्ति अच् बधादेशश्च ।) वृक्षविशेषः, सोनालु सोंदालि इति ख्यातः । तत्पर्य्यायः । राजवृक्षः २ सम्पाकः ३ चतुरङ्गुलः ४ आरेवतः ५ व्याधिघातः ६ कृतमालः ७ सुवर्णकः ८ । इत्यमरः ॥ मन्थानः ९ रोचनः १० दीर्घफलः ११ नृपद्रुमः १२ हिमपुष्पः १३ राजतरुः १४ कण्डुघ्नः १५ ज्वरान्तकः १६ अरुजः १७ स्वर्णपुष्पः १८ स्वर्णद्रुः १९ कुष्ठसूदनः २० कर्णाभरणकः २१ महाराजद्रुमः २२ कर्णिकारः २३ स्वर्णाङ्गः २४ । इति राजनिर्घण्टः ॥ प्रग्रहः २५ । इति रत्नमाला ॥ अस्य गुणाः । अतिमधुरत्वं । शीतलत्वं । शूलज्वरकण्डुकुष्ठमेहकफविष्टम्भनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । ज्वरहृद्रोगवातरक्तोदावर्त्तरोगे अतिशयपथ्यत्वं । मृदुत्वञ्च । अस्य फलगुणाः । मधुरत्वं । शुक्रकारित्वं । वातपित्तहारित्वञ्च । इति राजवल्लभः ॥ आमलतास इति हिन्दीभाषा ।
"आरग्वधो राजवृक्षः सम्पाकश्चतुरङ्गुलः ।
आरेवतव्याधिघातकृतमालसुवर्णकाः ॥
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ।
आरग्वधो गुरुः स्वादुः शीतलः स्रंसनोत्तमः ॥
ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलनुत् ।
तत्फलं स्रंसनं रुच्यं कुष्ठपित्तकफापहं ॥
ज्वरे तु सततं पथ्यं कोष्ठशुद्धिकरं परं" ।
इति भावप्रकाशः ॥
(व्यवहारो यथा,—
"बाले वृद्धे क्षते क्षीणे सुकुमारे च मानवे ।
योज्योऽमृदुलपायित्वाद्विशेषाच्चतुरङ्गुलः" ॥ * ॥
ग्रहणप्रणाली यथा ॥ * ॥
"फलकाले फलन्तस्य ग्राह्यं परिणतञ्च यत् ।
तेषां गुणवतां भारं सिकतासु निधापयेत् ॥
सप्तरात्रात् समुद्धृत्य शोषयेदातपे भिषक् ।
ततो मज्जानमुद्धृत्य शुचौ भाण्डे निधापयेत्" ॥ * ॥
संयोगविशेषे गुणा यथा ॥ * ॥
"द्राक्षारसयुतो देयो दाहोदावर्त्तपीड़िते ।
चतुर्व्वर्षसुखं बाले यावद्द्वादशवार्षिके । * ॥
चतुरङ्गुलमज्जानं प्रसृतं वायवाञ्जलिं ।
सुरामण्डेन संयुक्तमथवा कोलसीधुना ॥
दधिमण्डेन वा युक्तं रसेनामलकस्य वा ।
कृत्वा शीतकषायं तं पिबेत् सौवीरकेण वा" ॥
इति चरकः ॥)

आरट्टः, पुं, (आङ् + रट् + टच् ।) देशविशेषः । त्रिकाण्डशेषे क्षत्रियवर्गे आरट्टजशब्ददर्शनात् ॥ तत्र आरट्टजोऽपि पाठः ॥ (यथा भारते,—
"पञ्चनद्यो वहन्त्येता यत्र पीलुवनान्युत ।
शतद्रुश्च विपाशा च तृतीयैरावती तथा ॥
चन्द्रभागा वितस्ता च सिन्धुषष्ठा बहिर्गिरेः ।
आरट्टा नाम ते देशा नष्टधर्म्मा न तान् व्रजेत्" ॥
"पञ्च नद्यो वहन्त्येता यत्र निःसृत्य पर्व्वतात् ।
आरट्टा नाम वाह्लीका न तेष्वार्य्यो द्व्यहं वसेत्" ॥)

आरट्टजः, पुं, (आरट्टदेशे जायते आरट्ट + जन + ड ।) आरट्टदेशोद्भवघोटकः । इति जटाधरः